This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

श्रीरामह्रस्म
श्रीरामह्रस्म

॥२॥

श्रीगणेशाय नमः ॥ स गोत्रो वा सगोत्रो वा यो ऽग्निं दद्यात् स एव नरः ॥ सो ऽसौ पि कुर्य्यान्नवश्राद्धं तु दशमेहनीति वचना
त् ॥ तथा च अग्निदानोत्तरं पिंडदानात् पूर्वं पुत्रागमने तस्यैवाधिकार इत्याहुः ॥ अथैकादशाहकालः ॥ मृते ऽहनि तु क
र्त्तव्यं प्रतिमासं तु वत्सरम् ॥ प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ॥ वत्सरं यावदित्यर्थः ॥ लौगाक्षिः मासामासे मासिका
र्य्यमाब्दिकं वत्सरे गते ॥ आद्यमेकादशे कार्य्यं मध्ये त्वधिमासिकं समवत् ॥ आद्यपदमाद्यमासिकपरम् ॥ तत्रा
द्यमासिकस्य मृतिदिने प्राप्तस्योत्कर्षो विधीयते ॥ आद्यवार्षिकस्य वा काले प्राप्तस्यापकर्षः ॥ अत एव ब्राह्म
णभोजनपदाद्ये होतव्यमनलेऽथ वा पुनश्च भोजयेदेकं द्वित्राक्तितर्भवेदिति गोभिलेनाभयासिद्ध्यर्थं द्वित्राव्यक्ति
रुक्तात् तत्राद्यभोजनेनाद्यमासिकसिद्धिः तस्य मासादौ कर्त्तव्यनाद्यत्वात् ॥ द्वितीयभोजनेन वाद्याब्दिकसिद्धिः त
स्याब्दान्ते कर्त्तव्यत्वेनान्त्यत्वादिति पितामहचरणानिःसंशयमुक्ता आद्याभिप्रायः ॥ वस्तुतस्त्वाद्यपदमाद्यमासिकमात्रप
रम् ॥ आद्याब्दिकस्याब्दान्तेऽनुष्ठाने तेनैव वत्सरापराण्हत्वेनैवाब्दिकमिष्यते ॥ असङ्क्रान्तेऽहि कर्त्तव्यमाब्दिकं प्रथमं द्वि
जैरित्याद्यसंगतिप्रसक्तेः ॥ तथा चाद्यमासिकमेवैकादशाहे कार्य्यम् ॥ नाद्याब्दिकं ॥ अतस्त्वेकादशेऽहनि आद्य
विधीयते ॥ इत्याश्वलायनपरिशिष्टबृहस्पतिस्मृतिवाराहपुराणादौ विहिते का दशाह श्राद्धं च कार्य्यं ॥ एतद् ॥२॥

K.K.S.U. LIBRARY
RAMTEK
441106
M-1324
Dist Nagpur

Checked 2012

Accession No: ~~10223~~ M1324
Title:- श्राद्धस्मृति
पत्रे : 7

श्रीराम २

मिप्रायमेववद्धिराहव्यक्तिर्भवेत्याव्यक्तिवचनम्।अतश्चैकादशाहेआद्यमासिकमन्यन्नवश्राद्धमेकादशाहवि
हितमेकोदिष्टंचैवेतितत्रयम्।।यदापंचनवश्राद्धानितदाएकोदिष्टद्वयम्।।एतेनैकादशाहेएकोदिष्टश्रा
द्धचतुष्टयम्।आद्यमासिकम्।।अत्यंतुनवश्राद्धानितदाएकोदिष्टद्वयम्।एतेनैकादशाहेएकोदिष्टश्राद्धच
तुष्टयम्।।आद्यमासिकमेकादशाहविहितमेकोदिष्टातश्चैतिवदन्स्मन्त्यशानःपरास्ताः।।केचित्तुआद्यनव
श्राद्धमप्येकादशाहे।।आद्यमेकादशाहनीत्यनेनाद्यनवश्राद्धस्याप्युत्कर्षविधानादित्याहुःसत्यंचैसद्धर्मवि
रोधात्तद्येन्द्यएकादशेभ्योविप्रेभ्योदद्यादेकादशेहनित्यादिर्वस्याजंकारशघादिपितुर्यद्धाहनादिवत्।
गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्तॄन्समर्पयेतइत्यादिश्चतत्रैवधर्म्मविधिःमासिकावादेवचाद्यश्राद्धस्याभि
न्यता।।माधवयाभिप्रायोप्येवमितिवदामः।।शामापरेशा।।समतीतेदशाहेतुहेनाशौचविधानतः।।वत्रेद्वाद
शिकंश्राद्धंत्रयोदशिकमेवचस्थानानिदासदासीश्चवेश्मानिसमहांतिचभूषणानिचमुख्यानिराजशस्त्र
स्योर्ध्वदेहिकम्।।वशिष्ठः।।राजानिचप्रेतेदद्यात्प्रासंगिकमित्येतेनमातापितृव्यक्तिर्व्याख्यातेति।।प्रास
गिकंभोगसाधनंशय्यादानादिमातापितृव्यक्तिः।।मातापितृश्राद्धेशय्यादिदानेचर्त्तनमित्यर्थः।।

श्री हलस १
श्रीराम २
॥२॥

श्रीरामोविजयतेतराम्

तथा च शय्यादिदानं पित्रो राजस्वं न भ्रातृपितृव्यादिषु इति फलितम्॥ क्षत्रियादिभिस्त्वाद्यश्राद्धमाशौचमध्य एवैकादशाहे कार्यम्॥ आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि॥ कर्त्ता तु तात्कालिकी शुद्धिरशुद्धः पुनरेव स इति हेमाद्रौ शंखोक्तेः॥ न चैवं ब्राह्मणस्याप्याशौचान्तरपातविषयम्॥ एकादशेऽहनि तथा विप्रान्भोजयेद्यवतु॥ क्षत्रादिः सूतकान्ते तु भोजयेदयुजो द्विजान् इति मात्स्ये क्षत्रियादीनां सूतकान्तविधानात्॥ इति वाच्यम्॥ एकादशेऽहनि पश्चाद्युक्तं तत्सामान्यमुदाहृतम्॥ चतुर्णामपि वर्णानां सूतके तु पृथक्पृथक् इति पैठीनसिना शंखस्योपसंहारात्॥ न चानेनाद्यश्राद्धमेव तस्य सामान्यतापि वीप्सते न तु काल इति वाच्यम्॥ द्वादशाहादिदिवसानामाद्यश्राद्धविधौ नाप्येवं सामान्यतासिद्धेः॥ मात्स्ये तु सूतकान्तविधानं सर्ववर्णानां दशाहाशौचविषयम्॥ अतो मात्स्यात् क्षत्रियादीनां सूतकान्त एवैकादशाहवद्धेतोऽशौचापरामर्शात्॥ त्र्यहाशौचविरोधमाहोशनाः॥ त्र्यहाशौचे तु कर्त्तव्यमाद्यमेकादशेऽहनि अतीतविषये सद्यस्त्रिरात्रे दिवा तिर्व्यते सद्यःशौचवत्येकादशाह एवाद्यश्राद्धं॥ सद्यःशौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि स एव दिवसस्तस्य श्राद्धशय्यासनादिष्विति॥ सत्यव्रतोक्तेः एतन्मठे मृतस्य तु सद्यःशौचेऽपि सद्य एव श्राद्धं॥ उपनेताऽऽह वेदशास्त्रे क्षेत्र धर्म्मे हतस्य वै सद्यः सान्तिच्छतेनपसन्नस्तथाशौचमिति स्मृतिरिति मदनरत्ने पुनु ॥२॥

श्रीराधाकृष्ण
श्रीराधाकृष्ण

केचिद्वागूर्ध्वंतस्यापिपुत्रेसौकादशाहएवश्राद्धंकर्त्तव्यम्॥ महागुरुनिपातेद्वादशरात्रंदानाध्य
यनेवर्जयेदित्याश्वलायनेनपुत्रस्याशौचाधिक्योक्तेः॥ सघः संतिष्ठतेयज्ञस्तस्येतत्तुसपिंडादि
कर्त्तृविषयं मित्याहुस्तन्न॥ कर्त्तृविषयत्वेनपुत्रविषयत्वेनविशेषशास्त्रस्यतुल्यत्वात्॥
संध्यावंदनादिवर्जनेदानाध्ययनवर्जनस्याशौचाभावाच्च॥ एकादशाहविघ्नेकालान्तरमाह
हेमाद्रौबोधायनः एकोद्दिष्टश्चएवस्याद्द्वादशेऽहनिवापुनः॥ अतऊर्ध्वमयुग्मेषुकुर्वीताहस्सशांभि
भिः॥ अर्द्धमासेयवामासिऋतौसवत्सरेपिवाकौर्मेऽपि॥ एकादशेऽहनिकुर्वीतप्रेतमुद्दिश्यभावतः।
द्वादशेऽवान्हिकर्त्तव्यमामिषेप्यथवाहनि॥ अनिघशब्देनोपहोरात्र॥ बोधायनोक्तेकालेऽव्य
ते॥ वृषोत्सर्गेप्येकादशाहएवाघश्राद्धात्पूर्वः परोवाकार्यः॥ एकादशाह्निप्रेतस्ययस्यनोत्सृज्य
तेवृषः प्रेतत्वंसुस्थिरंतस्यदत्तैः श्राद्धशतैरपि॥ इतिषड्त्रिंशन्मतात्॥ अयंचपुत्रस्यैवनित्योऽन्यस्य
काम्यः॥ नकरोतिवृषोत्सर्गंसतीर्थेवाजलांजलीन ददातिसुतोयस्तुपितुरुच्चारएवसइतिमात्स्यात्।

श्रीराधाकृष्ण
श्रीराधाकृष्ण
स्मृ० ॥३॥

यस्तूद्दिश्योत्सृजेन्नीलं स लभेत परां गतिमिति देवीपुराणाच्च ॥ यत्तु मात्स्ये एष्टव्या बहवः पुत्राः यद्येकोपि ग
यां व्रजेत ॥ यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत ॥ तन्न ॥ वृषोत्सर्जनादिनित्यबोधकं किन्तु बहु
पुत्रोत्पादनविधेरर्थवादः ॥ अथाश्वमेधस्यापि नित्यत्वापत्तेः ॥ अस्य गौणकालो भविष्ये उक्तो चैत्र्यां
वापि तृतीयायां वैशाख्यां द्वादशेन्हि वा विष्णुधर्मेपि ॥ विष्णुवीहूतये वैवस्मृताहे बांधवस्य वा मृतेन्हि
वार्षिकश्राद्धदिने ॥ स्त्रीणां विशेषः स्मृतिसंग्रहे ॥ पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ॥ वृषोत्स
र्जनं कुर्वीत गां तु दद्यात्पयस्विनीम् ॥ अत्र पतिपुत्रयोः साहित्यं विवक्षितं इष्टरूपोपादानात् ॥ सहग
मनेपि मातुर्गोदानमेव ॥ पतिशब्दस्य ॥ देहविशिष्टात्मवाचकत्वेन सहगमनकाले उभयत्वात् ॥ अ
थ शय्यादानकालः ॥ मृतकान्ते द्वितीयेऽह्नि शय्यां दद्याद्विलक्षणाम् ॥ काञ्चनं पुरुषं तद्वत्फलं व
स्त्रसमन्वितं संपूज्य द्विजदंपती नानाभरणभूषितं ॥ अनेनैकादशाहो विधीयते ॥ न द्वादशाहः ए
कादशाहे पितृतया विधिरेष प्रकीर्तित इति भविष्ये नोपसंहारात् ॥ अस्य गौणकालीननाम्नानन्तरोक्त ॥३॥

र्त्नोयः। एतत्काम्यनीनित्यं। स्वर्ङ्गजपुरन्दरपुरे सत्य्पुत्रालपेतया। सुषंवसत्यसोजन्तुः शम्यादानप्रभा
वतइति भविष्यात्॥ अथोदकुंभकाल्नः हेमाद्रौ स्मृतिसमुच्चये॥ एकादशाहात्प्रभृति वृद्धेतोपान्नं सह
पुतः दिने दिने प्रदद्यात्प्रेयापावत्संवत्सरं स्मृतेः॥ यघप्यत्रतोपान्नं पेयो वृद्धविशेषणात्व श्रुत्वं तथापि तोय
मेव वृद्धविशेषणात् अन्नं तु वृद्धत्वात्प्रधानम्॥ यस्य संवत्सरादर्वाक्सपिंडीकरणं कृतं॥ तस्याप्यन्नं सो
दकुंभं दद्यात्संवत्सरं द्विज॥ इति जाग्यवल्क्योक्तेः॥ यदातुकनिष्ठपुत्रेणामुदकेकालानानीतंत्रमाप
पौत्रादिनावञ्ध्यर्थं सपिंडीकरणं कृतं॥ तदा ज्येष्ठपुत्रेण पुनः कार्यं। यवीयसा कृतं कर्म प्रेतश्रा
द्धं विहाय तु तत् ज्यायसापि कर्तव्यं सपिंडीकरणं पुनरिति वचनात्॥ अस्मादेव वचनात्पौत्रा
दीनां कृते सपिंडीकरणे पुत्रेण पुनः कर्तव्यम्॥ यदा तु पौत्रा ज्येष्ठः तदा पौत्रेणापि कृते सपिंडी
करणे पुत्रस्य नावृत्तिः॥ यद्वाधिकारं निष्ठाज्येष्ठ छतेहाविवन्दिता। नवेदं वचनं भ्रात्रादिमरणवि
षयमस्त्विति वाच्यं॥ भ्रातापि अधिकारे ज्येष्ठत्वकनिष्ठत्वयोरनुपयोगात्॥ ननु ज्येष्ठकृतेपि सपिंडी
करणे पुनरावृत्तिरस्तु कनिष्ठादिमुखं द्विज इत्यनेन तस्य वृद्धिमात्रार्थत्वावगमेनेन दर्श आद्य

श्रीराधामेस
श्रीरामलेख
स्मृ॥४॥

घर्थपितृत्वानुत्पत्तेरिति वेत्। अनेन वृद्धिमात्रार्थत्वागमेपि शास्त्रान्तरात् वृद्धसर्वार्थत्वापायात्॥ ० ॥
इति श्राद्धस्मृतिसमाप्ता॥ सम्वत् १८ ६८ पौषवल् स्म अच्छम्यानविवासने

४१२

K.K.S.U. LIBRARY
RAMTEK
441 106
M-1324
Dist. Nagpur

⑦

```
[OrderDescription]
,CREATED=20.10.20 12:04
,TRANSFERRED=2020/10/20 at 12:06:09
,PAGES=7
,TYPE=STD
,NAME=S0004212
,Book Name=M-1324-SHRADH SMRITI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,
```